श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

## श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ उत्सवस्तबकः द्वादशः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ उत्सवस्तबकः द्वादशः ॥

विख्यात विभवा सा मां विष्णुपत्नी विलोकताम्।
विपुलानुत्सवान् यस्या विरिञ्च्याद्या वितन्वते ॥ **12.1** ॥

विधिशिवप्रमुखा विबुधेश्वराः
    विविधमच्युतपत्नि तवोत्सवम्।
अकलयन् सकलस्य शरीरिणो
    निरवधीरवधीरयितुं व्यधाः ॥ **12.2** ॥

निरुपमं युवयोः शुभमुत्सवं
    जननि लोकयितुं धृतकौतुकाः।
उपगता किल काऽपि परा त्वरा
    पुरवधूरवधूतगृहक्रिया ॥ **12.3** ॥

जननि सत्वरचङ्क्रमसम्भ्रमे
    चरणतः पतितौ मणिनूपुरौ।
तव महोत्सव भूभजनोन्मिषत् -
    कुतुकया तु कयाचिदनादृतौ ॥ **12.4** ॥

तव महे गतिमान्द्यकृतौ कुचा -
    विति रुषा चलिताशु रमेऽपरा।
अनुगृहीततदञ्चलनिर्गलन् -
    नवसरावसरात्ययभीरुका ॥ **12.5** ॥

श्रुतभवन्महवाद्यरवा जवात्
    पथि रमे चलिताभरणस्वनैः।
श्रुतरुतेऽन्तरितेऽस्मि सुवञ्चिते -
    त्यपरया परया हसिता वधूः॥ **12.6** ॥

महमहीभजनोत्कलिकाकृत -
    द्रुतगतिः श्लथपुष्पसराऽपरा।
कृतवतीव मुदा कुसुमाञ्जलिं
    तव रमे वरमेखल मध्यमा॥ **12.7** ॥

महजुषस्तव देवि सिसेविषा
    दिशति मन्दगतेरपि सद्गतिम्।
तदिह दिव्यगतिं वितरिष्यसि
    त्वममले मम लेखदुरासदाम्॥ **12.8** ॥

अभिचकाङ्क्ष मनःप्रभवं जवं
    चरणयोरपि काचन सादरा।
कलयितुं भवतीं कलशाम्बुधेः
    दुहितरं हितरम्यमहोत्सवाम्॥ **12.9** ॥

जननि तामरसोदरसोदर -
    श्रियमवेक्ष्य सविस्मयमुत्सवे।
न ततृपुर्नरदैवतयोषितः
    शुभवतीं भवतीं सह शौरिणा॥ **12.10** ॥

प्रियतमार्पितयावकपादया
    तव महोत्सव भूर्न यया स्त्रिया।
द्रुतमगामि पदोर्न परं धृतः
    कुपितयाऽपि तयारुणिमा दृशोः॥ **12.11** ॥

अभिवृषाचलमापततां द्रुतं
    तव रमे परमोत्सवलिप्सया।
अजनि नो पथिभिः समयात्ययो
    दिविषदां विषदान्तरितैरपि॥ **12.12** ॥

प्रसृमरागरुधूपपरम्परा -
    सुरभिताः शुभदीपशतादृताः।
त्रियुगपत्नि महोत्सवभूमयः
    सुरचयं रचयन्ति सविस्मयम्॥ **12.13** ॥

तव मह प्रतिनन्दनकम्पितैः
    सुरतरोः शिखरैः स्वयमीरिताः।
जननि वेङ्कटशैलमभूषयन्
    सुमनसो मनसो हरणक्षमाः॥ **12.14** ॥

शुभतराभरणाभरणात्मना
    रुचितरङ्गपिशङ्गित सद्मना।
जननि सार्थयसे मरुतां महोत् -
    सवपुषा वपुषाऽनिमिषा दृशः॥ **12.15** ॥

मधुजिता सममुत्सवमण्टपे
    स्थितवतीं भवतीमवलोकितुम्।
अभिरुचिः पुनरात्तकुतूहलैः
    निजगृहे जगृहे न वधूजनैः॥ **12.16** ॥

अधिमहोत्सवमर्णवकन्यके
    परमभक्तिजुषां प्रणतिस्तव।
तनुधनुर्लतया सुदृशां गुरु -
    स्तनतया नतया सुकराऽभवत्॥ **12.17** ॥

भजनहर्षज नाट्यजवोच्चलन् -
मुकुटलोलमरुत्सरिदुत्थितैः।
जलकणैर्भवदुत्सवमेदिनीः
शशिशिराः शिशिराः कुरुते रमे॥ **12.18** ॥

त्रिणयनेन विनम्रशिरः क्षरत् -
त्रिदशसिन्धुमहोर्मिभिरुत्सवे।
किमपि पाद्यमदायि पदाब्जयोः
नतवता तव तामरसालये॥ **12.19** ॥

तव महे मिलितात् त्रिदशीगणात्
न बिभिदे नरलोक वधूजनः।
त्वदवलोकनविस्मयतो यतो
जननि मे न निमेषमवाप सः॥ **12.20** ॥

प्रणयिना सममुत्सवमण्टपे
स्थितिमतीं भवतीं प्रणिनंसवः।
हरिगिरिं हरिपत्नि समाश्रिताः
त्रिदिविनो दिवि नोपययुः स्पृहाम्॥ **12.21** ॥

अधिमहं भवतीं कमले स्तुवन्
अभिमुखः स्तिमितेक्षणमग्रतः।
अपि सुरेष्वसुरेषु नरेषु वा
शिरसि को रसिको न दधेऽञ्जलिम्॥ **12.22** ॥

अधिमहोत्सवमप्सरसां गणैः
सह रमे परभक्तिजुषस्त्वयि।
पुलकिनः कलगद्गदगीतयो
मुनिजना निजनाट्यमदर्शयन्॥ **12.23** ॥

उपगतोत्सवदिव्यगृहाङ्गणः
    कमलवासिनि संयमिनां गणः।
निगमसौरभशोभनया स्तुतिं
    स हि गिराऽहिगिरावकरोत् तव॥ **12.24**॥

मधुविरोधिपुरन्ध्रि महोत्सवे
    शुभगुणग्रथिता किल मालिका।
स्तवमयी स्तबकैस्तव कैर्गिरां
    न कलिता कलिताडन काङ्क्षिभिः॥ **12.25**॥

तव महे स्तवकोटिचिकीर्षया
    दृगधिका रसनाश्चकमे रमे।
रचयितुं स्तवमेकरसज्ञया
    कृशतमं शतमन्युरितत्रपः॥ **12.26**॥

तव हरेर्दयिते दृढभक्तितः
    चतसृभिः श्रुतिभिश्चतुराननः।
अभिनुतिं तनुते स्म महोत्सवे -
    ष्वहरहर्हरहर्यभिनन्दिताम्॥ **12.27**॥

जननि गन्धवहैर्भवदुत्सवे
    खगपतिः श्रुतिसौरभशोभनैः।
श्रमहरैर्जनितैर्निजपक्षति -
    व्यजनतो जनतोषणमातनोत्॥ **12.28**॥

तनुभृतां तव देवि महोत्सवे
    नटनगाननतिस्तवनादयः।
परमभक्तिभरादिह नाभवन्
    श्रमकरा मकरालयकन्यके॥ **12.29**॥

पदयुगं तव भक्तिभरादहं
　　प्रथमिकामुपगम्य सुरस्त्रिया।
हरिपुरन्ध्रि महेऽङ्गजितस्फुरत्
　　कनकया न कया परिचर्यते॥ **12.30** ॥

दिनकरं तमसामिव राजयः
　　कमलवासिनि कल्मषपङ्क्तयः।
अपि विलोकयितुं प्रभवन्ति ते
　　जनमहो न महोत्सवदर्शिनम्॥ **12.31** ॥

तव महे सुरदानवमानव
　　प्रभृतिपादहतिप्रभवै रमे।
क्षितिरजोनिचयैः स्थगितातपो
　　दिनकरो न करोति जनव्यथाम्॥ **12.32** ॥

अथ तवास्यविधोरवलोकनात्
　　सुरकराम्बुरुहाणि महोत्सवे।
मुकुलितान्युडुपङ्क्तिपरिस्फुरन्
　　नवरदे वरदे कमलालये॥ **12.33** ॥

मुकुलितं नियमेन कराम्बुजैः
　　मुदितमक्षिचकोरकुलैः सताम्।
तव महेऽम्ब हरौ नयनीभवत्
　　रविविधौ विविधौजसि भात्यपि॥ **12.34** ॥

तव सिषेविषया विषयान्तर -
　　त्यजननिश्चलचेतस उत्सवे।
प्रजहुरम्ब तपोऽपि पराशर -
　　प्रभृतयो भृतयोगकलाः स्वयम्॥ **12.35** ॥

सुमनसो मुनयश्च तवोत्सवे
त्रिदिवधेनुपयोरसधारया।
विरचयन्त्यभिषेकविधानमृक् -
चय जुषां यजुषां प्रकरै रमे ॥ **12.36** ॥

विधिशिवादिसुरेषु तवोत्सवे
विरचयत्स्वभिषेचनमिन्दिरे।
मनुशतं मुनिमाणवकाः स्फुट -
ध्वनि जगुर्निजगुर्वभिचोदिताः ॥ **12.37** ॥

तव महेष्वभिषेकविधौ कृते
जगदशेषमगादपतापताम्।
तदिदमद्भुतमम्ब फलिस्थलात्
फलगतिर्लगति स्म परत्र यत् ॥ **12.38** ॥

अथ तवोत्सवधाम्नि बुधाः सुधा -
करसहोदरि सादरमर्चयन्।
सुरभिळैर्भवतीं श्रुतषट् पदा -
रवकुलैर्वकुलैरपि चम्पकैः ॥ **12.39** ॥

मधुलिहां भवदङ्घ्रिसमर्पित -
प्रसववासवतां कमले तदा।
सुरकिरीटगताज्जगृहे भिदा
रवलवैर्बलवैरिशिलाकुलात् ॥ **12.40** ॥

सुमनसो भवदङ्घ्रिजुषां रमे
सुमनसामनुषङ्गत उत्सवे।
तव पदान्तिकभाजमपूजयन्
सुमलिनामलिनामपि मण्डलीम् ॥ **12.41** ॥

स्वशिरसा दधतः कुसुमं मुदा
 सुमहिता इति नाद्भुतमुत्सवे।
चरणयोः सुरपङ्क्तिभिरर्पितं
 तव नरा वनराशितनूभवे॥ **12.42** ॥

पनसचूतफलादिभिरुज्ज्वलं
 सरससूपमपूपशतावृतम्।
अथ निवेदनमम्ब सुरैः क्षरद् -
 घृतवरं तव रम्यमकल्प्यत॥ **12.43** ॥

जननि शेषतया भृशमुत्सुकैः
 तव निवेदितशेषमभुज्यत।
सुमधुरं सुमनोभिरथोत्सवा -
 पवरके वरकेतनभूषिते॥ **12.44** ॥

अथ सुधान्यभवं जनमोदनं
 जननि मानसरञ्जनमोदनम्।
भवदवेक्षणसंस्कृतमत्ति यो
 रसनया स न याचति तां सुधाम्॥ **12.45** ॥

अधिभवद्भवनाग्रवितर्दिकं
 जननि जाग्रत एव जयादयः।
अगणयन्नमरानपि तावके
 घनमहे न महेन्द्रपुरःसरान्॥ **12.46** ॥

जनविमर्दशमोद्यतनिर्दयोद् -
 भटचमूपतिवेत्रहतिस्पृशाम्।
प्रहृतिरस्ति मदम्ब महे तवा -
 र्चनकृतां न कृतान्तकृतान्ततः॥ **12.47** ॥

तव महोत्सववैभवदर्शिनां
    तनुभृतां विविधैः स्तवनादिभिः।
प्रमुदिता कमले भवती सतीः
    अपरिपूः परिपूरयति श्रियः॥ **12.48** ॥

जननि तस्य जनस्य वृथा सुधा -
    सहभवे विदधे विधिरीक्षणे।
य इह नानुभवेदलसस्तवो -
    त्सवरसं वरसंमदकारणम्॥ **12.49** ॥

भवदीयोत्सवविभवं
    फणिपतिवाचस्पतिप्रभृतिवर्ण्यम्।
कथमल्पधियः कवयः
    कथयन्तु क्षीरधेः कन्ये॥ **12.50** ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे उत्सवस्तबकः द्वादशः॥